जीवशाकः, पुं, (जीवो हितकरः शाकः। जीवाख्यः शाको वा। ) मालवे प्रसिद्धशाकविशेषः। तत्पर्य्यायः जीवन्तः २ रक्तनालः ३ ताम्रपत्रः ४ प्रवालः ५ शाकवीरः ६ सुमधुरः ७ मेषकः ८। अस्य गुणाः। सुमधुरत्वम्। बृंहणत्वम्। वस्तिशोधनत्वम्। दीपनत्वम्। पाचनत्वम्। बल्यत्वम्। वृष्यत्वम्। पित्तापहारकत्वञ्च। इति राजनिर्घण्टः॥

जीवशुक्ला, स्त्री, ( जीवयतीति। जीव+णिच्+अच्। जीवा हितकरी शुक्ला शुभ्रवर्णलता।) क्षीरकाकोली। इति राजनिर्घण्टः॥

जीवश्रेष्ठा, स्त्री, ( जीवाय जीवनाय श्रेष्ठा। ) ऋद्धिनामौषधम्। इति राजनिर्घण्टः॥

जीवसंज्ञः, पुं, ( जीव इति संज्ञा यस्य। यद्वा, जीवस्य संज्ञा आख्या संज्ञा यस्य। ) कामवृद्धिवृक्षः। इति राजनिर्घण्टः॥

जीवसाधनं, क्ली, (जीवस्य जीवनस्य साधनं कारणम्।) धान्यम्। इति राजनिर्घण्टः॥

जीवसूः, स्त्री, ( जीवं प्राणिनं सूते इति। सू+क्विप्।) जीवत्तोका। जीवत्पुत्रिका। हेमचन्द्रः। ३। १९४॥ ( यथा, महाभारते। १।२००।७।
"जीवसूर्वीरसूर्भद्रे! बहुसौख्यगुणान्विता।
सुभगा भोगसम्पन्ना यज्ञपत्नी पतिव्रता॥" )

जीवस्थानं, क्ली, ( जीवस्य जीवनस्य स्थानम्। ) मर्म्म। इति हलायुधः॥

जीवा, स्त्री, (जीवयतीति। जीव+णिच्+अच्। ततष्टाप्।) जीवन्तीवृक्षः। मौर्व्वी। ( यथा, आर्य्यासप्तशत्याम्। ३। २१।
"निर्गुण इति मृत इति च द्वावेकार्थाभिधायिनौ विद्धि।
पश्य धनुर्गुणशून्यं निर्ज्जीवं तदिह शंसन्ति॥"
"निर्गता जीवा ज्या यस्मात् तत्। 'जीवा ज्या शिञ्जिनीत्यपि' इत्यभिधानात्।" इति तट्टीका॥) वचा। शिञ्जितम्। भूमिः। इति मेदिनी। वे, ८॥ जीवितम्। इति जटाधरः॥

जीवातुः, पुं, क्ली, ( जीवत्यनेनेति। जीव+"जीवेरातुः।" उणां। १। ८०। इति करणे आतुः।) भक्तम्। जीवनौषधम्। ( यथा, काशीखण्डे। २९। ६५।
"जीवजीवातुलतिका जन्मिजन्मनिवर्हिणी॥"
"जीवानां प्राणिनां जीवनौषधरूपा।" इति तट्टीका॥*॥ (जीव+भावे आतुः।) जीवितम्। इति मेदिनी। ते, ११२॥ (यथा, उत्तररामचरिते २ अङ्के।
"रे हस्त दक्षिण! मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम्।
रामस्य गात्रमसि दुर्व्वहगर्भखिन्न-
सीताविवासनपटोः करुणा कुतस्ते॥" )

जीवात्मा, [ न् ] पुं, ( जीवस्य जीवनस्य आत्मा अधिष्ठाता। यद्वा, जीवश्चासौ आत्मा चेति कर्म्मधारयः।) देही। तत्पर्य्यायः। पुनर्भवी २ जीवः ३ असुमान् ४ सत्त्वम् ५ देहभृत् ६ जन्तुः ७ जन्युः ८। इति हेमचन्द्रः॥ प्राणी ९ चेतनः १० जन्मी ११ शरीरी १२। इत्यमरः। १।४।३०॥ ( यथा, भागवते। ८। २२। २५।
"यदा कदाचित् जीवात्मा संसरन्निजकर्म्मभिः।
नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत्॥"
"एवं चतुर्व्विंशतिभिस्तत्त्वैः सिद्धे वपुर्गृहे।
जीवात्मा नियतो नित्यं वसति स्वात्मदूतवान्॥
स देही कथ्यते पापपुण्यदुःखसुखादिभिः।
व्याप्तो बद्धश्च मनसा कृत्रिमैः कर्म्मबन्धनैः॥
कामक्रोधौ लोभमोहावहङ्कारश्च पञ्चमः।
दशेन्द्रियाणि बुद्धिश्च तस्य बन्धाय देहिनः॥
आप्नोति बन्धमज्ञानादात्मज्ञानाच्च मुच्यते॥"
इति पूर्व्वखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम्॥)

जीवाधारः, पुं, ( जीवस्य क्षेत्रज्ञस्य आधारः आश्रयस्थानम्। ) क्षेत्रम्। इति हेमचन्द्रः॥

जीवान्तकः, पुं, ( जीवं अन्तयति नाशयतीति। अन्त+णिच्+ण्वुल्। ) जीवनार्थं पक्षिघातकः। तत्पर्य्यायः। शाकुनिकः २। इत्यमरः। २। १०। १४॥ जीवनाशके, त्रि॥

जीवाला, स्त्री, ( जीवं उदरस्थकृमिं आलाति गृह्णाति नाशयतीत्यर्थः। आ+ला+कः। ) सैंहली। इति राजनिर्घण्टः॥

जीविका, स्त्री, ( जीव्यतेऽनयेति। जीव+"गुरोश्च हलः।" ३।३।१०३। इत्यः। ततः संज्ञायां कन् टापि अत इत्वञ्च।) जीवनोपायः। तत्पर्य्यायः। आजीवः २ वार्त्ता ३ वृत्तिः ४ वर्त्तनम् ५ जीवनम् ६। इत्यमरः। २। ९। १॥ जीवः ७। इति शब्दरत्नावली॥ (यथा, मनुः। ४। ११।
"अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकाम्॥")
जीवन्ती। इति मेदिनी। के, ९५॥

जीवितं, क्ली, ( जीव+भावे क्तः। ) जीवनम्। इति हेमचन्द्रः॥ (यथा, उत्तररामचरिते ३ अङ्के।
"त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव, शान्तमथवा किमिहोत्तरेण॥"*॥
कर्त्तरि क्तः।) जीवनयुक्ते, त्रि॥ (यथा, रघुः। १२। ७५।
"कामं जीवति मे नाथ इति सा विजहौ शुचम्।
प्राङ्मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता॥" )

जीवितकालः, पुं, ( जीवितस्य जीवनस्य कालः। ) आयुः। इत्यमरः। २। ८। १२०॥

जीवितज्ञा, स्त्री, ( जीवितस्य जीवनस्य ज्ञा ज्ञानं यस्याः। नाड़ीस्पन्दनेन हि जीवानां जीवनज्ञानादस्यास्तथात्वम्।) नाड़ी। इति राजनिर्घण्टः॥

जीवितेशः, पुं, ( जीवितस्य ईशः प्रभुः। ) प्राणनाथः। यमः। ( यथा, रघुः। ११। २०।
"राममन्मथशरेण ताड़िता
दुःसहेन हृदये निशाचरी।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा॥"
"जीवितेशस्य अन्तकस्य प्राणेश्वरस्य च वसतिं जगाम।" इति तट्टीकायां मल्लिनाथः॥) चन्द्रः। सूर्य्यः। इति शब्दरत्नावली॥ जीवातुः। इति हेमचन्द्रः॥ जीवितेश्वरे, त्रि। इति मेदिनी। शे, ३५॥

जीवी, [ न् ] पुं, ( जीवोऽस्त्यस्येति। जीव+इनिः।) प्राणी। यथा, ब्रह्मवैवर्त्ते गणेशखण्डे।
"जीविनां दारुणो रोगः कर्म्मभोगः शुभाशुभः।
भक्तो वैद्यस्तं निहन्ति कृष्णभक्तिरसायनात्॥"

जीव्या, स्त्री, ( जीवाय जीवनाय हिता। जीव+यत्। ) गोक्षुरदुग्धा। जीवन्ती। हरीतकी। इति राजनिर्घण्टः॥

जु, रंहसि। इति कविकल्पद्रुमः॥ ( भ्वां-परं-अकं-अनिट्।) रंहो वेगगतिः। जवति घोटकः। इति दुर्गादासः॥

जु, ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-अनिट्।) ङ, जवते। इति दुर्गादासः॥

जुग, इ त्यागे। इति कविकल्पद्रुमः॥ ( भ्वां-परं-सकं-सेट्।) इ, कर्म्मणि जुङ्ग्यते। इति दुर्गादासः॥

जुगुप्सनं, क्ली, (गुप+स्वार्थे सन्+ल्युट्।) निन्दा। इति हेमचन्द्रः।२।१८५॥(निन्दाशीले, त्रि। तत्र "अनुदात्तेतश्च हलादेः।" ३।२।१४९। इति युच्॥)

जुगुप्सा, स्त्री, ( गुप निन्दायाम्+सन्+भावे अ-स्ततष्टाप्।) निन्दा। इत्यमरः। १। ६। १३॥ ( यथा, साहित्यदर्पणे। ३। १७६।
"दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा॥")

जुङ्गः, पुं, ( जुगि+अच्। ) वृद्धदारकः। इत्यमरः। २। ४। १३७॥ ( यथास्य पर्य्यायाः।
"जुङ्गश्छगन्धाच्छगलान्त्रावेगी वृद्धदारकः॥"
इति वैद्यकरत्नमालायाम्॥)

जुङ्गकः, पुं, (जुङ्ग+स्वार्थे कन्।) वृद्धदारकवृक्षः। इति राजनिर्घण्टः॥

जुङ्गा, स्त्री, ( जुङ्ग+टाप्। ) जुङ्गः। इत्यमरटीकायां रमानाथः॥

जुङ्गितः, त्रि, ( जुग इ त्यागे+कर्म्मणि क्तः। ) त्यक्तः। इति व्याकरणम्॥

जुटकं, क्ली, ( जुट् संहतौ+"इगुपधेति।" ३। १। १३५। इति कः। ततः संज्ञायां कन्। ) जटा। इति शब्दरत्नावली॥

जुटिका, स्त्री, ( जुटक+टाप्। टापि अत इत्वञ्च।) शिखा। इति शब्दरत्नावली॥ झुँटी इति टिकी। इति च भाषा॥ ( यथा, आह्निकतत्त्वधृतब्रह्मपुराणवचनम्।
"जुटिकाञ्च ततो बद्ध्वा ततः कर्म्म समारभेत्॥")

जुड़, क नोदे। इति कविकल्पद्रुमः॥ ( चुरां-परं-सकं-सेट्।) क, जोड़यति। नोदः प्रेरणम्। इति दुर्गादासः॥

जुड़, श गतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) श, जुड़ति जोड़िता। इति दुर्गादासः॥